**संस्कृत**बालादर्शे एकादशः पाठः ॥ ११ ॥

वीणा घण्टा

अत्र । तत्र । कुत्र ?

**गायकः । परुषः । मधुरः ।**

अत्र एका वीणा अस्ति । गायकः वीणां वादयति । घण्टा कुत्र वर्तते ? घण्टा तत्र वर्तते । रामः घण्टां वादयति । घण्टायाः स्वरः परुषः । वीणायाः स्वरः मधुरः ॥

मालती वीणां सम्यग् वादयति । मालविका मधुरं गायति । कोकिला वसन्ते मधुरं कूजति । गानेन सर्वे जनाः तुष्यन्ति ॥

**क)** प्रश्नाः ।

| | |
|---|---|
| १। कुत्र एका वीणा अस्ति? | अत्र एका वीणा अस्ति । |
| २। कः वीणां वादयति? | गायकः वीणां वादयति । |
| ३। कः घण्टां वादयति? | रामः घटां वादयति । |
| ४। कस्याः स्वरः परुषः? | घण्टायाः स्वरः परुषः । |
| ५। कस्याः स्वरः मधुरः? | वीणायाः स्वरः मधुरः । |
| ६। का सम्यग् वीणां वादयति? | मालती सम्यग् वीणां वादयति । |
| ७। का कदा मधुरं कूजति? | कोकिला वसन्ते मधुरं कूजति । |
| ८। केन सर्वे जनाः तुष्यन्ति? | गानेन सर्वे जनाः तुष्यन्ति । |

ख)  ' तद् ' शब्दस्य रूपैः वाक्यानि पूरयत - - -

१।  ___ गायकः _ वीणां वादयति।  सः गायकः तां वीणां वादयति।

२।  ___ नद्यौ भेकान् पश्यतः।  ते नद्यौ भेकान् पश्यतः।

३।  ___ बालाः ___ फलानि भक्षयन्ति।  ते बालाः तानि फलानि भक्षयन्ति।

ग)  ' किं ' शब्दस्य प्रथमा विभक्ति रूपाणि - - -

| | ए | द्वि | ब |
|---|---|---|---|
| पुंलिङ्गे (who) | कः | कौ | के |
| स्त्रीलिङ्गे (who) | का | के | काः |
| नपुंसकलिङ्गे (what) | किं | के | कानि |

घ)  अर्थ भेदं वदत - - -

गच्छति goes,  आगच्छति comes.

नयति takes, leads.  आनयति brings.

ङ)  विपरीत पदम्

| | |
|---|---|
| परुषः | मधुरः |
| उच्चैः | मन्दं |
| आरोग्यम् | अनारोग्यं |
| खलः | साधुः |
| भीरुः | शूरः |

## शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

घण्टा ghaṇṭā = *f* bell

अत्र atra = *in* here

तत्र tatra = *in* there

कुत्र kutra= *in* where ?

गानम् gānam = *n* song

गायकः gāyakaḥ = *m* singer

परुषः paruṣaḥ = *a.m.* harsh

मधुरः madhuraḥ = *a.m.* sweet

अस्ति asti = *P.* is

वादयति vādayati = *P.* plays

सम्यग् samyag = *in* well

वसन्तः vasantaḥ = *m* spring season

कोकिला kokilā = *f* cuckoo

सर्व sarva= *m* all